**Bhagavad-Gītā Reading**
**Sanskrit 101b**

Introduction

The Bhagavad Gītā (or "Song of the Lord") comes down to us as a small piece of the vast Mahābhārata epic poem: 700 verses (that is, 1,400 lines) out of something like 100,000 (200,000) in total. (For perspective, this is 4x as large as the second largest Sanskrit epic, the Rāmāyaṇa, which contains about 50,000 lines. Compare also the Iliad, the Odyssey, and the Aeneid, which contain 16,000, 12,000, and 10,000 lines, respectively.) The Mahābhārata centers on a great war, "long ago in the land of India," between the ancestral Kaurava and Pāṇḍava families. The Gītā, in turn, is situated on the front line of the first battle, moments before it begins, and serves as a poignant and profound meditation on moving forward and living well in a morally complicated world.

Authorship of the Mahābhārata, and therefore of the Gītā, is traditionally ascribed to the divine sage Vyāsa, sometime in the third millenium BCE, as is the case with the Vedas and Purāṇas. The competing academic view is that the Mahābhārata is a composite text, i.e., the result of hundreds of years of modification at the hands of thousands of co-authors, which arrived at something like its current form in the mid-first-millenium CE. The Gītā, however, is more often spoken of as the product of a single inspired mind. These are, not surprisingly, contentious questions.

The Gītā takes the form of a dialogue between the Pāṇḍava prince Arjuna and his cousin, Kṛṣṇa, avatar of the god Viṣṇu. At Arjuna's despair over the prospect of an apocolyptic war that will annihilate both sides, Kṛṣṇa offers him encouragement in the form of teachings on the nature of the soul and on the various paths of yoga, so as to help Arjuna embrace his proper, if difficult role as a warrior (kṣatriya).

As is the case with much epic literature, the Gītā takes place within a series of nested narrative frames. Here, the immediate frame is a conversation between the blind king Dhṛtarāṣṭra and his charioteer Sañjaya. Dhṛtarāṣṭra's belligerent son Duryodhana, the leader of the Kauravas, is preparing to lead his army into battle. Dhṛtarāṣṭra wants to know what is happening, but because he is blind, he needs Sañjaya to verbally convey the scene to him. Sañjaya is not on the battlefield himself, but thanks to his "divine eye," he is able to observe and relate to Dhṛtarāṣṭra the action on the battlefield, which is named Kurukṣetra...

Chapter 1

( = Chapter 23 of the sixth book of the Mahābhārata, called Bhīṣma-parvan, "The Book of Bhīṣma.")

On Dhṛtarāṣṭra's request, Sañjaya begins to describe the battlescene. Sañjaya begins by narrating a short discussion between the Kaurava leader Duryodhana and his mentor Droṇa.

धृतराष्ट्र उवाच ।

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।

मामकाः पाण्डवाश्चैव किमकुर्वत संजय ।। १ ।।

संजय उवाच ।

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।

आचार्यमुपसंगम्य राजा वचनमब्रवीत् ।। २ ।।

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।

व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ।। ३ ।।

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।

युयुधानो विराटश्च द्रुपदश्च महारथः ।। ४ ।।

Proper names:
On the side of the Kaurava (descendents of Kuru): Sañjaya, Duryodhana, Drupada, Yuyudhāna, Virāṭa
On the side of the Pāṇḍavas (descendents of Pāṇḍu):, Bhīma, Arjuna

More hints:
Nouns: kṣetram, anīkam, camūḥ, maheṣvāsaḥ, yudh, rathaḥ
Adjectives (including verbal ones): māmaka, yuyutsu, samaveta, vyūḍha, śūra, sama

Duryodhana continues to detail the heroic characters on the scene and how they are committed to fighting for him. Then all the Kauravas, led by revered grandfather Bhīṣma, sound their conch shells.

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित् कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥
अस्माकं तु विशिष्टा ये तान् निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥ ७ ॥
भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १० ॥
अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ ११ ॥
तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलो ऽभवत् ॥ १३ ॥

The action then shifts to the Pāṇḍavas, led by Arjuna and Kṛṣṇa, who blow their own conches in response. The noise is said to shake the very earth and sky, and also the confidence of the Kauravas.

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥
पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥
काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक् ॥ १८ ॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ १९ ॥

Now we shift our gaze to the Pāṇḍava prince Arjuna, with Śrī Kṛṣṇa serving as his charioteer. On Arjuna's command, they move in for a closer look at the front lines. (Remember: The charioteer Sañjaya is narrating all of this to king Dhṛtarāṣṭra.)

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।

प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ।। २० ।।

हृषीकेशं तदा वाक्यमिदमाह महीपते ।

सेनयोरुभयोर्मध्ये रथं स्थापय मे ऽच्युत ।। २१ ।।

यावदेतान् निरीक्षे ऽहं योद्धुकामानवस्थितान् ।

कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ।। २२ ।।

योत्स्यमानानवेक्षे ऽहं य एते ऽत्र समागताः ।

धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ।। २३ ।।

Epithets and names: Hṛṣīkeśa, Acyuta, Dhārtarāṣṭra (group name)

More hints:
Nouns: kapi-dhvaja, sampāta, dhanus, raṇa, yuddha
Adjectives (including verbal ones): vyavasthita, yoddhavya, yotsyamāna, samāgata, cikīrṣu

With the chariot maneuvered into position, Kṛṣṇa urges Arjuna to survey the scene, which he does.

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।

सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ।। २४ ।।

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।

उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ।। २५ ।।

तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान् ।

आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस्तथा ।। २६ ।।

श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि ।

तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान् ।। २८ ।। ...(not a full sentence yet)...

Epithets and names: Hṛṣīkeśa, Guḍākeśa, Bhārata, Bhīṣma, Droṇa, Kuru, Kaunteya

More hints: pramukha-taḥ, mahī-kṣit, pitāmaha

As Arjuna looks at the soliders on both sides, the enormity of the impending battle finally dawns on him. It seems as though the very leader of the Pāṇḍava army is about to lose heart.

कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून् समवस्थितान् ।। २८ ।।

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।। २९ ।।

गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते ।

न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।। ३० ।।

निमित्तानि च पश्यामि विपरीतानि ।

न च श्रेयो ऽनुपश्यामि हत्वा स्वजनमाहवे ।। ३१ ।।

Epithets and names: Gāṇḍīva, Keśava

More hints:

Nouns: kṛpā, gātram, vepathuḥ, roma-harṣaḥ, tvac, nimittam, śreyas, āhavaḥ

Adjectives (including verbal ones): parayāviṣṭa, viparīta

Verbs: vi+sad, pari+śuṣ, sraṁs, pari+dah, śak, ava+sthā, bhram, anu+dṛś

Arjuna rationalizes his reluctance to Kṛṣṇa, foreseeing a chain reaction of disastrous consequences.

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२ ॥
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमे ऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः स्यालाः संबन्धिनस्तथा ॥ ३४ ॥
एतान् न हन्तुमिच्छामि घ्नतो ऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥
निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान् नार्हा वयं हन्तुं धार्तराष्ट्रान् सबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥
यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥
कथं न ज्ञेयमस्माभिः पापादस्मान् निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥
कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मो ऽभिभवत्युत ॥ ४० ॥
अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥
संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥

With his resolve at rock-bottom, Arujuna declares that he simply will not fight.

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।

नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

अहो बत महत् पापं कर्तुं व्यवसिता वयम् ।

यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।

धार्तराष्ट्रा रणे हन्युस्तन् मे क्षेमतरं भवेत् ॥ ४६ ॥

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।

विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

Hints:

Nouns: kulam, narakam, vāsaḥ, lobhaḥ, saṁkhyam, cāpaḥ, mānasam

Adjectives (including verbal ones): utsanna, vyavasita, udyata, a-pratīkāra, a-śastra, śastra-pāṇi, kṣema, upastha, sa-śara, saṁvigna

Verbs: anu+śru, vi+sṛj

Indeclinables: niyatam, bata

Chapter 2
( = Mahābhārata Book 6, Chapter 24)

This chapter, the longest of the book, summarizes the spiritual teachings on *yoga* and the *ātman*. (Highlighted verses to be read along with audio track.)

At the outset, Arjuna is not doing so well.

संजय उवाच

तं तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम् ।

विषीदन्तम् इदं वाक्यम् उवाच मधुसूदनः ।। १ ।।

Hints: aśru, īkṣaṇam, madhu (not "honey" here)

Kṛṣṇa rebukes him for his reluctance, but Arjuna insists.

श्रीभगवान् उवाच ।
कुतस् त्वा कश्मलम् इदं विषमे समुपस्थितम् ।
अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् अर्जुन ।। २ ।।
क्लैब्यं मा स्म गमः पार्थ नैतत् त्वय्य् उपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ।। ३ ।।
अर्जुन उवाच ।
कथं भीष्मम् अहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हाव् अरिसूदन ।। ४ ।।

The war seems so awful to Arjuna, he's not even sure whether winning or losing would be the better outcome.

गुरून् अहत्वा हि महानुभावाञ् ।
श्रेयो भोक्तुं भैक्षम् अपीह लोके ।
हत्वार्थकामांस् तु गुरून् इहैव ।
भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥ ५ ॥
न चैतद् विद्मः कतरन् नो गरीयो ।
यद् वा जयेम यदि वा नो जयेयुः ।
यान् एव हत्वा न जिजीविषामस् ।
ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

Utterly confused now, Arjuna asks Kṛṣṇa for help.

कार्पण्यदोषोपहतस्वभावः ।
पृच्छामि त्वां धर्मसंमूढचेताः ।
यच् छ्रेयः स्यान् निश्चितं ब्रूहि तन् मे ।
शिष्यस् ते ऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥
न हि प्रपश्यामि ममापनुद्याद् ।
यच् छोकम् उच्छोषणम् इन्द्रियाणाम् ।
अवाप्य भूमाव् असपत्नम् ऋद्धं ।
राज्यं सुराणाम् अपि चाधिपत्यम् ॥ ८ ॥

Even while asking for Kṛṣṇa's advice, Arjuna reaffirms his reluctance to fight.

संजय उवाच
एवम् उक्त्वा हृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह ॥ ९ ॥
तम् उवाच हृषीकेशः प्रहसन्न् इव भारत ।
सेनयोर् उभयोर् मध्ये विषीदन्तम् इदं वचः ॥ १० ॥

Kṛṣṇa then begins to teach Arjuna why, given the nature of the soul, such trepidation is misplaced and inappropriate.

श्रीभगवान् उवाच

अशोच्यान् अन्वशोचस् त्वं प्रज्ञावादांश् च भाषसे ।

गतासून् अगतासूंश् च नानुशोचन्ति पण्डिताः ॥ ११ ॥

Hint: asuḥ

Kṛṣṇa speaks on behalf of the *ātman*. What is immortal cannot come into being (since it already exists permanently), nor can it pass away. The things Arjuna is worried about are things of the mere body, which Kṛṣṇa says should be taken in stride. The eternal *ātman* cannot not killed.

न त्व् एवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयम् अतः परम् ॥ १२ ॥
देहिनो ऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर् धीरस् तत्र न मुह्यति ॥ १३ ॥
मात्रास्पर्शास् तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनो ऽनित्यास् तांस् तितिक्षस्व भारत ॥ १४ ॥
यं हि न व्यथयन्त्य् एते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सो ऽमृतत्वाय कल्पते ॥ १५ ॥
नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोर् अपि दृष्टो ऽन्तस् त्व् अनयोस् तत्त्वदर्शिभिः ॥ १६ ॥
अविनाशि तु तद् विद्धि येन सर्वम् इदं ततम् ।
विनाशम् अव्ययस्यास्य न कश् चित् कर्तुम् अर्हति ॥ १७ ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनो ऽप्रमेयस्य तस्माद् युध्यस्व भारत ॥ १८ ॥
य एनं वेत्ति हन्तारं यश् चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

Kṛṣṇa sums up the above and offers a tangible metaphor. Yet the *ātman* is anything but tangible.

न जायते म्रियते वा कदा चिन् नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतो ऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥

वेदाविनाशिनं नित्यं य एनम् अजम् अव्ययम् ।

कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरो ऽपराणि ।

तथा शरीराणि विहाय जीर्णान्य् अन्यानि संयाति नवानि देही ॥ २२ ॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।

न चैनं क्लेदयन्त्य् आपो न शोषयति मारुतः ॥ २३ ॥

अच्छेद्यो ऽयम् अदाह्यो ऽयम् अक्लेद्यो ऽशोष्य एव च ।

नित्यः सर्वगतः स्थाणुर् अचलो ऽयं सनातनः ॥ २४ ॥

अव्यक्तो ऽयम् अचिन्त्यो ऽयम् अविकार्यो ऽयम् उच्यते ।

तस्माद् एवं विदित्वैनं नानुशोचितुम् अर्हसि ॥ २५ ॥

Hints: a-vināśin, ghātayati (a causative, but from what?...), bhavitā ( a new verb form, don't worry ), vāsas, dehin, viditvā (gerund), arh (with infinitive...)

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुम् अर्हसि ।। २६ ।।

जातस्य हि ध्रुवो मृत्युर् ध्रुवं जन्म मृतस्य च ।

तस्माद् अपरिहार्ये ऽर्थे न त्वं शोचितुम् अर्हसि <u>।। २७ ।।</u>

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्य् एव तत्र का परिदेवना ।। २८ ।।
आश्चर्यवत् पश्यति कश् चिद् एनम् ।
आश्चर्यवद् वदति तथैव चान्यः ।
आश्चर्यवच् चैनम् अन्यः शृणोति ।
श्रुत्वाप्य् एनं वेद न चैव कश् चित् ।। २९ ।।
देही नित्यम् अवध्यो ऽयं देहे सर्वस्य भारत ।
तस्मात् सर्वाणि भूतानि न त्वं शोचितुम् अर्हसि ।। ३० ।।
स्वधर्मम् अपि चावेक्ष्य न विकम्पितुम् अर्हसि ।

... verses 31 through 41 omitted here ...

वेदवादरताः पार्थ नान्यद् अस्तीति वादिनः ।। ४२ ।।
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ।। ४३ ।।
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ।। ४४ ।।
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।। ४५ ।।
यावान् अर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।। ४६ ।।

Kṛṣṇa explains the proper attitude to have toward actions and results. The chief obstacle here is attachment, and not only to results, but also sometimes to inaction itself, as in Arjuna's present case. The result of proper yoga? Freedom from rebirth, and also from needing to rely on traditional knowledge.

कर्मण्य् एवाधिकारस् ते मा फलेषु कदा चन ।

मा कर्मफलहेतुर् भूर् मा ते सङ्गो ऽस्त्व् अकर्मणि ॥ ४७ ॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय ।

सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

दूरेण ह्य् अवरं कर्म बुद्धियोगाद् धनंजय ।

बुद्धौ शरणम् अन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।

तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।

जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्य् अनामयम् ॥ ५१ ॥

यदा ते मोहकलिलं बुद्धिर् व्यतितरिष्यति ।

तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

Hints: karman, adhikāraḥ, mā bhūḥ ( a new verb construction, don't worry ), siddhi, avara (an historically controversial point of translation...), phala-hetu (what kind of compound is this?...), iha ubhe (sandhi irregularly suspended here), vyati+tṝ, gantāsi ( a new verb construction, don't worry )

A few more thoughts on the relationships between attachment, intelligence, and peace of mind, with another question by Arjuna.

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधाव् अचला बुद्धिस् तदा योगम् अवाप्स्यसि ॥ ५३ ॥

अर्जुन उवाच
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किम् आसीत व्रजेत किम् ॥ ५४ ॥

श्रीभगवान् उवाच
प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्य् एवात्मना तुष्टः स्थितप्रज्ञस् तदोच्यते ॥ ५५ ॥
दुःखेष्व् अनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर् मुनिर् उच्यते ॥ ५६ ॥
यः सर्वत्रानभिस्नेहस् तत् तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥
यदा संहरते चायं कूर्मो ऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस् तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥
विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसो ऽप्य् अस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥
यततो ह्य् अपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।

वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता <u>॥ ६१ ॥</u>

ध्यायतो विषयान् पुंसः सङ्गस् तेषूपजायते ।

सङ्गात् संजायते कामः कामात् क्रोधो ऽभिजायते <u>॥ ६२ ॥</u>

क्रोधाद् भवति संमोहः संमोहात् स्मृतिविभ्रमः ।

स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ ६३ ॥

रागद्वेषवियुक्तैस् तु विषयान् इन्द्रियैश् चरन् ।
आत्मवश्यैर् विधेयात्मा प्रसादम् अधिगच्छति ॥ ६४ ॥
प्रसादे सर्वदुःखानां हानिर् अस्योपजायते ।
प्रसन्नचेतसो ह्य् आशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

नास्ति बुद्धिर् अयुक्तस्य न चायुक्तस्य भावना ।

न चाभावयतः शान्तिर् अशान्तस्य कुतः सुखम् ॥ ६६ ॥

इन्द्रियाणां हि चरतां यन् मनो ऽनुविधीयते ।

तद् अस्य हरति प्रज्ञां वायुर् नावम् इवाम्भसि ॥ ६७ ॥

तस्माद् यस्य महाबाहो निगृहीतानि सर्वशः ।

इन्द्रियाणीन्द्रियार्थेभ्यस् तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥
आपूर्यमाणम् अचलप्रतिष्ठं समुद्रम् आपः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिम् आप्नोति न कामकामी ॥ ७० ॥
विहाय कामान् यः सर्वान् पुमांश् चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिम् अधिगच्छति ॥ ७१ ॥
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्याम् अन्तकाले ऽपि ब्रह्मनिर्वाणम् ऋच्छति ॥ ७२ ॥

। श्रीमद्भगवद्गीतायां द्वितीयोध्यायः समाप्तः ।